Reg. No. : ....................................

Name : ..........................................

**S-2210**

**SECOND YEAR HIGHER SECONDARY**
**SAY / IMPROVEMENT EXAMINATION, JUNE – 2023**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours
Cool-off time : 15 Minutes

*निर्देशा:*

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു.
- ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.



P.T.O.

DITTO WS

I. **1-8 प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकम् एकैकः अङ्कः ।**

**1 മുതൽ 8 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും തെരഞ്ഞെടുത്ത് എഴുതുക ഓരോ സ്കോർ വീതം.** **8 × 1 = 8**

1. 'बालशशिनमिव सायमलोलम्' – का ?

   (सखी, सीता, राधिका)

2. महाभारतस्य कर्ता कः ?

   (व्यासः, भासः, कालिदासः)

3. "सालारम्" इदं कस्य नाम भवति ?

   (गृहस्य, कार्यालयस्य, वृद्धसदनस्य)

4. 'मुनिनातेननीतोऽसौ' – अत्र मुनिः कः ?

   (येशुदेवः, जोसफ्, यहूदबालकः)

5. गौतमबुद्धस्य पत्नी का ?

   (राधिका, यशोधरा, सीता)

6. कौटिल्यशिष्यः कः ?

   (चाणक्यः, चन्द्रगुप्तः, राक्षसः)

7. योगसूत्रस्य उपज्ञाता कः ?

   (पाणिनिः, वररुचिः, पतञ्जलिः)

8. सङ्गात् किम् सञ्जायते ?

   (कामः, सम्मोहः, क्रोधः)

DITTO WS

**II. 9-11 प्रश्नद्वयोः उत्तरम् उदाहरणानुसारं लिखत । प्रत्येकं द्वौ अङ्कौ ।**

**9 മുതൽ 11 വരെ ഉള്ള ചോദ്യങ്ങളിൽ രണ്ടെണ്ണത്തിന് ഉത്തരമെഴുതുക. 2 സ്കോർ വീതം.** **(2 × 2 = 4)**

9. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा – पठन्नासीत् – पठन् + आसीत् ।

(1) कुर्वन्नासीत् – _______ + _______ ।

उदा : भ्रातुरेकः – भ्रातुः + एकः ।

(2) सेतुरेकः – _______ + _______ ।

10. मातृकानुसारं वाक्यं परिवर्त्य लिखत ।

मातृका – विद्यालयं गच्छति । पाठं पठति ।

विद्यालयं गत्वा पाठं पठति ।

(1) घण्टानादं श्रुणोति । कक्ष्यां प्रविशति ।

___________________________ ।

(2) गृहपाठं करोति । रात्रिभोजनं अश्नाति ।

___________________________ ।

11. उदाहरणानुसारं सन्धत्त ।

उदा. गृहेषु + अपि – गृहेष्वपि ।

(1) विदेशेषु + अपि – _______ ।

करोति + एव – करोत्येव ।

(2) लिखति + एव – _______ ।

**III. 12-15 त्रयाणां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं त्रयः अङ्काः** **(3 × 3 = 9)**

**12 മുതൽ 15 വരെ ചോദ്യങ്ങളിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 3 സ്കോർ വീതം.**

12. अधः प्रदत्तं वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि चित्वा लिखत ।

अनुजानां शब्दं श्रुत्वा शारिका नीडात् बहिरागता । वृक्षस्य अधः प्रसृतान् तण्डुलान् आहर्तुम् उद्युक्तायां – “हा हतोऽस्मि” । इति रुदितं निशम्य सर्वे चकिताः अभवन् ।

13. अधोरेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थकपदानि चित्वा वाक्यं पुनर्लिखत ।

गुरुदेव ! मर्षयन्तु भवन्तः, अपराधिने चोराय दण्डनमिति सामाजिकीं व्यवस्थां अनुसृत्य एव आवेदनम् अदाम ।

(तस्कराय, उपक्षेपं, गच्छतु, क्षम्यताम्)

14. आशयेन सह पद्यं योजयत ।

| (क) | (ख) |
|---|---|
| 1. क्लैब्यं मा स्म गम पार्थ ! नैतत्त्वय्युपपद्यते, क्षुद्रं हृदयदौर्बल्यम् त्यक्त्वोत्तिष्ठपरन्तप ।। | 1. आत्मना एवं आत्मानं उद्धरेत् । आत्मनः रिपुः बन्धुश्च आत्मा भवति । |
| 2. उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैवह्यात्मनोबन्धुः आत्मैव रिपुरात्मनः ।। | 2. हे पार्थ, क्लैब्यं मा गम । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा हे परन्तप उत्तिष्ठ । |
| 3. देवान् भावयतानेन ते देवाः भावयन्तु वः । परस्परं भावयन्तो श्रेयः परमवाप्स्यथ ।। | 3. यज्ञकर्मणा देवान् तोषयन्तु । एवं तुष्यन्तः देवाः वर्षादिभिः प्रकृति विभवैः मानवान् च तोषयन्ति । |
| | 4. इन्द्रियविषयसुखेषु अमितासक्तः सर्वनाशम् एति । |

15. संस्कृतभाषया अनुवदत ।

1. വിശാഖദത്തൻ എഴുതിയ പ്രശസ്ത സംസ്കൃത നാടകമാണ് മുദ്രാ രാക്ഷസം.
   Mudrarakshasa is the well known Sanskrit drama written by Visakhadatta.
2. ചന്ദ്രഗുപ്തന്റെ ഗുരുവാണ് ചാണക്യൻ.
   Chanakya is the teacher of Chandra Guptha.
3. കാവ്യങ്ങളെ ദൃശ്യം, ശ്രവ്യം എന്നിങ്ങനെ രണ്ടായി തരം തിരിച്ചിരിക്കുന്നു.
   Poetry is classified into two types viz : Drisya and Sravya.

**IV. 16-18 प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं चत्वारः अङ्काः ।**

**16 മുതൽ 18 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരമെഴുതുക. 4 സ്കോർ വീതം. (3 × 4 = 12)**

16. श्लोकं पठित्वा गद्यक्रमं लिखत ।

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ।।

आत्मना एष ______ बलवान् ______ च पित्रोः ______ समं ______ ।

17. सम्भाषणांशान् पूरयत ।

कुमारनाशान् – गुरुदेव, प्रणामम् ।

श्रीनारायणगुरुः – _______ प्रिय शिष्य !

कुमारनाशान् – अन्तेवासिभिः कश्चन चोरकल्पः गृहीतः ।

श्रीनारायणगुरुः – _______ वा ? तं किमकरोत् ?

कुमारनाशान् – कदलीफलगुञ्जं मुषित्वा गतं तं न्यायाधिप समक्षं अनयत् ।

श्री नारायणगुरुः – _______ किं दण्डनमघोषयत् तस्मै ?

कुमारनाशान् – _______ ताडनम् ।

नारायणगुरुः – हा कष्टं ! यतिवर्याः भूतदयालुतारहिताः किम् ?

कुमारनाशान् – क्षम्यताम् गुरोः ! इतः परं भूतदयालुतया भवामः ।

18. कोष्ठकात् प्रश्नवाचकानि शब्दानि चित्वा प्रश्नान् रचयतु ।

1. कूटियाट्टे चतुर्विधाभिनयप्रकाराः विद्यन्ते ।
2. संस्कृतरूपकाणि एव कूटियाट्टे अभिनीयन्ते ।
3. युनस्को संस्थायाः अङ्गीकारः प्रथमं प्राप्तं कलारूपं भवति कूटियाट्टम् ।
4. द्विसहस्रवर्षेभ्यः पूर्वं आरब्धं कलारूपं भवति कूटियाट्टम् । (किम् ?, कति ?, कदा ?, कुत्र ?.....)

**V. 19-22 प्रश्नेषु प्रश्नत्रयस्य उत्तराणि लिखत । प्रत्येकं पञ्च अङ्काः ।**

**19 മുതൽ 22 വരെ ചോദ്യങ്ങളിൽ 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം.**

19. प्रस्तुताप्रस्तुतानि यथोचित योजयत । **(3 × 5 = 15)**

| प्रस्तुतानि । | अप्रस्तुतानि । |
|---|---|
| आवासः | हुताशनकल्पम् । |
| मलयजपङ्कम् | यमः । |
| कन्दर्पः | विषम् । |
| प्रियसखीमाला | विपिनम् । |
| किसलयतल्पम् | जालम् । |

20. मलयाल भाषया आङ्गलभाषया वा अनुवदत ।

यशोधरे ! जीवितस्य वेदनामहमजानम् । केवलं जीवितुं कियान् क्लेशः अनुभूयते । दिनम्पूर्णे भारं वहन्तः, कठिनंमृदं विदारयन्तः, आतपे शिलां धूर्जयन्तः, एवमतिकठिनानि कर्माणि कुर्वन्तः । तथाऽपि अत्यावश्यकं अनार्जयन्तः एव भूरिणः ।

21. यथोचितं योजयत ।

| क | ख |
|---|---|
| 1. जयदेवः । | कूटियाट्टम् । |
| 2. आषामेनोन् । | क्रिस्तुभागवतम् । |
| 3. पि.सि. देवस्या । | महाप्रस्थानम् । |
| 4. माटम्पुकुञ्ञिकुट्टन् । | के. श्रीकुमार् । |
| 5. पद्मश्री पि.के. नारायणन् नम्प्यार् । | अष्टपदी । |

22. प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।

1. सम्मोहः कथं जायते ?
2. स्मृतिभ्रंशात् किं भवति ?
3. केन प्रणश्यति ?
4. श्लोकस्य आशयं स्ववाक्यैः लिखत ।

**VI. 23-27 निर्देशानुसारं चतुर्णां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं षडङ्काः ।**

**23 മുതൽ 27 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 6 സ്കോർ വീതം.** **(4 × 6 = 24)**

23. प्रदत्तं गद्यभागं पठित्वा संगृह्य लिखत ।

'नाटकान्तंकवित्वम्' इति प्रथा संस्कृतसाहित्ये नाटकस्य प्राधान्यं उपस्थापयति । भासकालिदासप्रभृतयः प्रतिभाः नाटककर्तृत्वेन विश्वप्रसिद्धाः भवन्ति । नाटककर्तृषु अन्यतमोभवति विशाखदत्तः । राजनीतिविषयकम् इतिवृत्तं स्वीकृत्य तेन विरचितं नाटकं भवति मुद्राराक्षसम् ।

विशाखदत्तस्य देशकालादिकमधिकृत्य विदुषां भिन्नाभिप्रायाः विद्यन्ते । किन्तु अस्मिन् रूपके गौडीरीतेः प्राबल्यात् गौडीदेशीयो भवत्ययं पण्डितः इति प्रतिभाति । मुद्राराक्षसस्य भरतवाक्ये 'श्रीमद्‌बन्धुभृत्याश्चिरमवतुमहीं पार्थिवश्चन्द्रगुप्त' इति पाठं द्रष्टुं शक्यते । अतः नाटकोऽयं चन्द्रगुप्तराजसमये रचितं, अभिनीतं च भवेत् इति विदुषां मतम् ।

मुद्राराक्षसे सप्त अङ्काः विद्यन्ते । नाटकेऽस्मिन् चाणक्याचार्यस्य कौटिल्यं, राष्ट्रमीमांसायाः तत्त्वानि च वर्णितानि । अभिप्रेतं कार्यं साधयितुं महात्मभिः तैराविष्कृतानि तन्त्राणि हृदयावर्जकानि भवन्ति । वीररसप्रधानेऽस्मिन् नाटके स्त्रीकथापात्राणां शृङ्गार रसस्य च चित्रणं विरलमेव । प्रख्यातेतिवृत्त-युक्तेऽस्मिन् नाटके सात्वती, आरभटी च वृत्तिः दृश्यते ।

24. कथास्तंभं क्रमीकरोतु ।

1. विषलिप्तः वृक्षः क्रमेण शुष्कः जातः ।
2. तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।
3. शारिका पुरतः तापसीम् अपश्यत् ।
4. वृक्षं अनादृत्य गन्तुं सा न समर्था ।
5. वृक्षः पल्लवितः पत्रैः शाखाभिः च सम्पुष्टः अभवत् ।
6. विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः ।

25. प्रदत्तं गद्यभागं पठित्वा एकां पटकथां लिखत ।

प्रातः निर्झर्याः कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा मन्दं-मन्दं आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम् । वृक्षस्य अधः कोटरवासी कश्चन सर्पः व्याधस्य पादयोरन्तरेण झटिति असरत् । विगलित लक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः । यद्यपि अहं रक्षिता तथाऽपि विषबाधितः वृक्षः क्रमेण नाशोन्मुखः जातः । एतं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिणश्च सर्वे गताः ।

26. संस्कृतभाषायाः महत्वमधिकृत्य सूचनाः उपयुज्य टिप्पणीं लिखत ।

(**सूचना** – सुभाषितानि, इतिहास-पुराणानि, काव्यनाटकादीनि, व्याकरणं, दर्शनानि)

27. प्रदत्तं गद्यांशं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

भारतीयेषु आस्तिकदर्शनेषु अन्यतमो भवति योगदर्शनम् । पतञ्जलिमहर्षिणा प्रणीतमिदं शास्त्रं शरीरस्य मनसः च विमलीकरणाय उपायान् निर्दिशन्ति । “योगश्चित्तवृत्तिनिरोधः” इति पतञ्जलिना योगलक्षणं निरूपितम् । पातञ्जलयोगसूत्रे (195) १९५ सूत्राणी सन्ति । युज् (योजने) – इत्यस्य योजनं अथवा संयोगः इत्यर्थः । योगस्य यम-नियम-प्राणायाम-प्रत्याहार धारणा-ध्यान समाधिरिति अष्टाङ्गानि सन्ति ।

1. योगदर्शनस्य प्रणेता कः ?
2. योगलक्षणं किम् ?
3. योगदर्शने कति सूत्राणि सन्ति ?
4. ‘योग’ शब्दस्य अर्थः कः ?
5. योगस्य अष्टाङ्गानि कानि ?

**VII. 28-29 प्रश्नयोः एकस्य उत्तरं लिखत । अष्टाङ्काः ।**

**28 മുതൽ 29 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരം എഴുതുക.**
**8 സ്കോർ.** **(1 × 8 = 8)**

28. अधः प्रदत्तेषु गीतेषु भवताम् इष्टतमं गीतं चित्वा सूचनानुसारं आस्वादनटीकां लिखत ।

(1) सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ।।

(2) हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् ।।

(3) स्तनविनिहितमपि हारमुदारम्
सा मनुते कृशतनुरिव भारम्
राधिका तव विरहे केशव ! ।

**सूचना** : आमुखम् आशयम्, आस्वादनम् ।।

29. अधः प्रदत्तां सूचनां पठित्वा श्रीनारायणगुरुदेवस्य भूतदयालुताम् अधिकृत्य एकम् उपन्यासं लिखत ।

(**सूचना :** अरुविप्पुरं मठः, कदलीफलगुञ्जापहरणम्, न्यायाधिपस्य दण्डनम्, श्रीनारायणगुरोः उपदेशः, चोरस्य मोचनम्)

---